International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2017; 3(3): 334-335
© 2017 IJSR
www.anantaajournal.com
Received: 03-03-2017
Accepted: 05-04-2017

**Abhijit Mandal**
Assistant Professor, Cooch Behar Panchanan Barma Univeisty Cooch Behar, WB
Ph.D Scholar of Ramakrishna Mission Vidyamandira,
Belur Math, Howrah, WB, India.

**Correspondence**
**Abhijit Mandal**
Assistant Professor, Cooch Behar Panchanan Barma Univeisty Cooch Behar, WB
Ph.D Scholar of Ramakrishna Mission Vidyamandira
Belur Math, Howrah, WB, India.

# अभिहितत्वानभिहितत्वविमर्शः

## Abhijit Mandal

### प्रबन्धसारांशः (Abstract)
**"अनभिहिते" इति पाणिनीयसूत्रमाश्रित्य वैयाकरणसिद्धान्तकौमुद्यां दीक्षितपादैः अभिहितत्वानभिहितत्वविमर्शविषये स्वमतं प्रतिपादितम् । तत्र अभिहितपदार्थस्तु उक्तःf प्रतिपादितो वा, अनुक्तस्तु अनभिहितपदार्थः । प्रोक्तसूत्रस्याधिकारे विभक्तिसूत्राणां पाठत्वात् कुत्र कथञ्च अभिहिते प्रथमायाः प्रसक्तिः, कुत्र च अनभिहिते द्वितीया इति विषयः परिष्कृतः दीक्षिताचार्यैः । तत्र अभिहिते तु कर्तृकारके प्रथमाविभक्तिः, अनभिहिते तु द्वितीयादिविभक्तिः जायते ।**
**अत्र तु सन्दर्भे अनभिहिते सूत्रस्य अधिकारे सति कथं विभक्तिकार्ये अयं प्रभेदः दृश्यते इति विषयः चर्चतो मया वैयाकरणसिद्धान्तकौमुद्याः बालमनोरमाटीकां समाश्रित्य ।**
**प्राबन्धिककुञ्चिपदानि – वैयाकरणसिद्धान्तकौमुदी, भट्टोजिदीक्षितः, अभिहितः, अनभिहितः, प्रथमाविभक्तिः, प्रातिपदिकार्थः, अधिकारः, कर्मणि द्वितीया, कारकं विभक्त्यर्थम्, संख्या विभक्त्यर्थः।**

### प्रस्तावना
अभिपूर्वकाद्धाधातोः क्तप्रत्यये निष्पन्नोऽयमभिहितशब्दः। उक्तः प्रतिपादितो वेत्यर्थः। तद्विपरीतस्यानभिहितस्यार्थस्तावदनुक्तः। "यावद् ब्रूयाद् अनुक्तेऽनिर्दिष्टे इति तावदनभिहिते" इति महाभाष्यकारवचनम्। अष्टाध्याय्याः "अनभिहिते"[1] इति सूत्रस्य व्याख्यानावसरे आचार्यभट्टोजिदीक्षितेन वृत्तौ 'इत्यधिकृत्य' इत्यनेन सूत्रमिदमधिकारसूत्रत्वेन प्रतिपादितम्। ननु कश्चाधिकारः? वैयाकरणमते "स्वदेशे लक्ष्यसंस्कारकवाक्यार्थबोधजनकत्वे सति विधिशास्त्रैकवाक्यतापन्न-लक्ष्यसंस्कारकवाक्यार्थबोधजनकत्वमधिकारसूत्रत्वम्" इति। परस्य पूर्वस्य वा सूत्रस्यार्थबोधाय कस्यचित् सूत्रस्य पदस्य पदानां सम्पूर्णसूत्रशरीरस्य वा या अनुवृत्तिर्भवति स एवाधिकारः। अत्र सम्पूर्णसूत्रशरीरस्य परसूत्रेष्वनुवृत्तौ सति अनभिहितेऽनुक्ते वा कर्मणि द्वितीया, कर्तरि करणे च तृतीया इत्यर्थो भवति स्फुटः। उक्तकर्मादौ तु प्रथमैव भवति। अतः 'कटं करोति' इत्यत्रानुक्तकर्मणि "कर्मणि द्वितीया"[2] इत्यनेन द्वितीयाविभक्तिः, परन्तु 'क्रियते कटः' इत्यादौ तिङा कर्माभिहितत्वात्तु प्रथमैव।

कुत्र अभिहिते प्रथमा, कुत्र च अनभिहिते द्वितीयादिविभक्तिः इति विषयः परिष्करणीयः। स्वतन्त्रः कर्ता भवति त्रिविधः अभिहितः, अनभिहितः, कर्मकर्ता चेति। अभिहिते कर्तरि प्रथमा यथा देवदत्तः पचति, अनभिहिते कर्तरि तृतीया च देवदत्तेन पच्यते। पुनश्च अनभिहिते अनुक्ते कर्मणि द्वितीया, करणे च तृतीया एवमन्यत्रैव विभक्तिकार्यं जायते। विषयोऽयं "कर्मणि द्वितीया" इति सूत्रे स्पष्टं दीक्षितेन "अनुक्ते कर्मणि द्वितीया स्यात्, हरिं भजति। अभिहिते तु कर्मणि प्रातिपदिकार्थमात्रे इति प्रथमैव। अभिधानं च प्रायेण तिङ्कृत्तद्धितसमासैः"।इति।[3]कर्मणः अभिहिते तु प्रातिपदिकार्थेणैव प्रथमा भवति। साधारणतः अभिधानं तिङ्कृत्तद्धितसमासैः एव भूयते। यथोदाहरणं यथाक्रमेण तिङः हरिः सेव्यते, कृतः लक्ष्म्या हरिः सेवितः, तद्धितस्य शतेन क्रीतः शत्यः, समासस्य च प्राप्त आनन्दो यं स प्राप्तानन्दः इति। यदि अनभिहिते कर्मादौ द्वितीयादयो विभक्त्यो भवन्ति इति चेत् "कृतः कटः" इत्यत्र क्तप्रत्ययेन कर्मणः अभिहितत्वात् कटशब्दात् द्वितीया न भवति, तथा "कटं करोति भीष्ममुदारं शोभनं दर्शनीयम्" इत्यत्र कटशब्दादुत्पाद्यमानया द्वितीयया भीष्मादिगतस्य कर्मणोऽभिहितत्वात् भीष्मादिभ्यो द्वितीया न प्राप्नोति। तस्मात् कश्चिद्विशेषोऽत्राभिमतः इति मत्वा तं विशेषं पृच्छति – "केनानभिहिते"? इति। अस्य समाधाने उच्यते "तिङ्कृत्तद्धितसमासै"रित्यादि। यत्र प्रातिपदिकेन कर्मत्वशक्तिरुद्भूता प्रकाशिता वा तत्र द्वितीया विभक्तिः भवति। यत्र तु

---

[1]पाणिनीयाष्टाध्यायी –२/३/१ ।
[2]पाणिनीयाष्टाध्यायी –२/३/२ ।
[3]वैयाकरणसिद्धान्तकौमुद्याः "कर्मणि द्वितीया" इति सूत्रे दीक्षितवचनम्।

कर्मत्वादिशक्तिरभिहितः तत्र प्रातिपदिकार्थे प्रथमा एव भवति। उक्तञ्च भाष्यकारेण "अभिहितः योऽर्थः अन्तर्भूतः प्रातिपदिकार्थः सम्पन्नः" इति।

ननु प्रातिपदिकेन प्रातिपदिकार्थे उक्ते सति कथं प्रथमा स्यात्? "उक्तार्थानामप्रयोगः" इति न्यायेन यत्र प्रातिपदिकार्थे प्रथमा भवति तत्र तु प्रातिपदिकेन प्रातिपदिकार्थस्योक्ते प्रथमा न स्यादेव। अत्रोच्यते कुत्रचित्स्थलेषु उक्तार्थस्यापि प्रयोगो भवति, यथा घटौ इत्यनेनैव द्वयोः घटयोः ज्ञानं जायते, तथापि द्वौ घटौ इति व्यवहारः दृश्यते। अत्र "अभिहिते प्रथमा" इति वार्तिकमेव प्रमाणम्। तिङादिभिः कर्मत्वशक्तेः अभिहितेऽपि प्रथमा भवति इत्येव वार्तिकस्यार्थः।

ननु "पक्वमोदनं भुङ्क्ते" इत्यत्र पचतेः कर्मवाच्ये क्तप्रत्ययेन कर्मणः उक्तत्वादपि कथं न प्रथमा? अत्रोच्यते कर्मणि ओदने तु शक्तिद्वयं वर्तते, पच्धात्वर्थक्रियानिरूपितकर्मत्वशक्तिः तथा भुज्धात्वर्थक्रियानिरूपितकर्मत्वशक्तिः। वाक्ये तु प्रधानक्रियानुसारेणैव विभक्तिः स्यात्। तिङन्तक्रिया एव प्रधानभूता, अप्रधाना तु कृदन्तक्रिया। उक्तस्थले तु प्रधानभूतभुज्धातुना कर्मत्वशक्तेरुनभिहितत्वादत्र कर्मणि द्वितीयायाः प्रसक्तिः। एवमेव "पक्वोदनः भुज्यते"इत्यत्र तु प्रधानभूतभुज्क्रियया कर्मत्वशक्तेरभिहितत्वादत्र उक्तकर्मणि प्रातिपदिकार्थे प्रथमा। अत्र महाभाष्यकारेण "अभिधानं च प्रायेण तिङ्कृत्तद्धितसमासैः" इति परिगणनायाः प्रत्याख्यानं विहितम्। ननु एक-द्वि-बहुप्रकृतिद्वारा एकत्व-द्वित्व-बहुत्वार्थस्याभिहितत्वात् एकत्वाद्यर्थे एकवचनादिविभक्तेः प्राप्तिः न स्यात्, इत्यादिषु एकवचनादिविभक्तेः प्राप्त्यर्थं "प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा" इति सूत्रे वचनग्रहणं सार्थकम्। तदुक्तं भाष्यकारेण "उक्तेष्वप्येकत्वादिषु प्रथमा यथा स्यात्"[4] इति।

ननु किं तावत् फलमधिकारस्य? वस्तुतः समानार्थबोधनाय भिन्नशब्दद्वयस्य प्रयोगस्तु निःष्प्रयोजनमेव। ननु बहुपटुरित्यादौ बहुच्प्रत्ययेनोक्तार्थत्वाद् कल्पबादयो यथा न प्रवर्तते, तथा क्रियते कट इत्यादावपि तिङादिभिः कर्मार्थोक्तत्वात् प्रथमैव स्यात्, न त्वत्र कट्-शब्दे द्वितीयाविभक्तिः।'उक्तार्थानामप्रयोगः' इति न्यायेनोक्तस्थले कर्मरूपार्थबोधाय न द्वितीयाविभक्तेः प्रसक्तिः निरवकाशतया[5] प्रथमयैव बाधिष्यते। तदुच्यते "सावकाश[6]विधिभ्यः स्याद्बली निरवकाशकः।

कस्यचिद्भिन्नकार्यस्य प्रथमे परतस्तथा"।। इति।।[7]

पुनश्च 'कटं करोति' इत्यत्र "कर्मणि द्वितीया" इत्यनेन द्वितीयाविभक्तेः सावकाशोऽपि वर्तते, अतो नास्ति प्रयोजनम् "अनभिहिते"[8] इति सूत्रस्याधिकारत्वेन।

न च वृक्षः प्लक्ष इत्यादौ तिङ्विभक्तेरप्रयोगात् प्रथमायाः अवकाशः। तत्रापि प्रतीयमानामस्तिक्रियां प्रति कर्तृत्वेन तृतीयाविभक्तिः। 'अस्ति भवन्तिपरः प्रयुज्यते' इति भाष्यवचनम्। अतोवृक्षः अस्ति, प्लक्षः अस्ति इत्यत्र अस्तिपदस्याध्याहारेण कर्तुः उक्तत्वेऽपि "कर्तृकरणयोस्तृतीया"[9]इति सूत्रेण तृतीयाविभक्तेः प्राप्तिः स्यात्। अतः प्रथमाविभक्तेरनवकाशत्वस्याक्षुण्णत्वात् कृतः कटः इत्यत्र द्वितीयाया निषेधः सदा।

पुनश्च 'नीलम्' 'रक्तम्' इत्यादिषु विशेषणान्तरनिवृत्तितात्पर्यकेऽस्ति-क्रियाया अनवकाशः। अत्र स्वसत्तायाः प्रकाशार्थमेव 'न नीलमिदं न तु रक्तमि'त्येवं प्रयोगे प्रथमाया अस्त्येवावकाशः। अतो निरवकाशत्वान्न द्वितीयाया वाधिका। तर्हि उभयोः सावकाशत्वे 'कृतः कटः' इत्यादिस्थले "विप्रतिषेधे परं कार्यम्"[10] इति सूत्रेण परत्वात्प्रथमैव स्यात्। तथा चानभिहिताधिकारो वृथैव।

अयमेव निष्कर्षो यत् 'संख्या विभक्त्यर्थः' इति पक्षे अधिकारत्वेन सूत्रारम्भ आवश्यकः। तथाहि सूत्रारम्भे "कर्मणि द्वितीया"[11] इत्यत्र 'अनभिहिते कर्मणि यदेकत्वं तत्र द्वितीयैकवचनमि'त्यर्थः स्यात्। तथा च सति कृतः कटः इत्यादौ कृत्प्रत्ययेन कर्ममात्रमेवोक्तम्। तत्र तद्गतैकत्वस्यावबोधाय द्वितीयाविभक्तेः प्राप्तिर्दुर्वारा। विना चाधिकारसूत्रं'कर्मणि यदेकत्वं तत्र द्वितीयैकवचनमि'त्यर्थः स्यात्, तेन क्रियते कटः इत्यादौ तु कर्मणः उक्तेऽपि तदेकत्वस्यानुक्ततया अम् दुर्वारः स्यात्, न चात्र परत्वात्प्रथमैव स्यादिति वाच्यम्, कर्तव्यः कट इत्यादौ ततोऽपि परत्वेनकृद्योगलक्षणषष्ठीप्रसङ्गात्। अत्र द्वितीयाया एकवचनं यथा न स्यात् तदर्थमेव सूत्रमिदमधिकारसूत्रत्वेन पठितव्यम्। विषयेऽस्मिन् "अनभिहितस्तु विभक्त्यर्थस्तस्मादनभिहितवचनम्" इति वार्तिकस्य व्याख्यायां भाष्यकारेण प्रोक्तम् "अनभिहितस्तु विभक्त्यर्थः। कः पुनर्विभक्त्यर्थः? एकत्वादयो विभक्त्यर्थाः। तेषु अनभिहितेषु सत्सु कर्मादयोऽभिहिताः विभक्तीनामुत्पत्तौ निमित्तत्वाय मा भूवन्निति। तस्मादनभिहितवचनम्। तस्मादनभिहिताधिकारः क्रियते" इति।[12]

केचन च संख्यायाः विभक्त्यर्थं न स्वीकुर्वन्ति। संख्या विशेष्ये कारकं विशेषणे चेत् संख्या विभक्त्यर्थः भवति, परन्तु न तत्क्वचित् संख्या संख्येये परतन्त्रत्वात्तस्य विशेषणरूपेणैव व्यवहारः। तेषां मते "कर्मणि द्वितीया"[13] इत्यस्य तत्रैवोल्लेखात् तयोः सम्बन्धस्तु श्रौतः। "श्रुतानुमितयोः श्रुतसम्बन्धः वलीयान्" इति कर्मकारकेण द्वितीयायाः साक्षादन्वयः करणीयः। तेन 'कारकं विभक्त्यर्थः' इति पक्षे तु कारकस्य क्तप्रत्ययादिनैवोक्तत्वात् प्रातिपदिकार्थे प्रवृत्तायाः प्रथमाया एकत्वादिबोधनसम्भवाच्चामादिविभक्तेरप्रवृत्तौ "अनभिहिते" [14] इति सूत्रं प्रत्याख्यातमाकर इति।

अन्तिमे एतदेव वक्तुं युज्यते यत् 'कारकं विभक्त्यर्थः' इति पक्षे तु आलोच्यसूत्रस्यास्याधिकारत्वेन नास्ति प्रयोजनम्। 'संख्या विभक्त्यर्थः' इति पक्षे तु आलोच्यसूत्रस्यास्याधिकारत्वेनास्ति प्रयोजनम्।

**ग्रन्थस्रोतांसि**


१) दीक्षितः, भट्टोजी. २०१०. *वैयाकरणसिद्धान्तकौमुदी(बालमनोरमा-तत्त्वबोधिनीटीकोपेता).* सम्पा. महामहोपाध्याय-गिरिधरशर्मणा परमेश्वरानन्दशर्मणा च. वाराणसीः मोतिलाल बनारसीदास.

२) नागेशः. २०१३ (प्रथमसंस्करणम्). *परमलघुमञ्जूषा.* 'किरणावली' संस्कृतव्याख्योपेत-हिन्द्यनुवादसहिता. सम्पा. आचार्य-लोकमणिदाहालः. वाराणसी: चौखम्बा सुरभारती प्राकाशनम्.

३) नागेशः. २००४ (प्रथमसंस्करणम्). *वैयाकरणसिद्धान्तलघुमञ्जूषा(प्रथमभागः).* श्रीमदुर्बलाचार्यविरचिता कुञ्जिका. श्रीमद्बालम्भट्टविरचिता कला इति टीकाद्वयेन संवलिता. सम्पा. मानवेन्दु-व्यानार्जी. कलिकाता: संस्कृत-पुस्तक-भाण्डारः.

४) नागेशः. १९९०(प्रथमसंस्करणम्). *वैयाकरणसिद्धान्तलघुमञ्जूषा(प्रथमभागः).* सम्पा. रामप्रसाद-त्रिपाठी. वाराणसी: सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः.

५) सान्यालः, अयोध्यानाथः. २००८. *वैयाकरणसिद्धान्तकौमुदी कारकप्रकरणम् (बङ्गभाषायाम्).* कलिकाता: संस्कृतपुस्तकभाण्डार.

६) हालदारः, गुरुपदः. २००६. *व्याकरणदर्शनेर इतिहास (वङ्गभाषायाम्).* कोलकाता: संस्कृतवुक्-डिपो.


[4]"प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा" (२/३/४६) इति सूत्रस्य भाष्यवचनम्।

[5]गुरुपदहालदारकृत-व्याकरणदर्शेर इतिहास-इति ग्रन्थस्य उपोद्घाते ३७५ पृष्ठायां यत्प्राप्यते-

"सम्भवेद् विषयो यस्य स भवेत् सावकाशकः।

आदौ हि विषयो यस्य परतो न हि सम्भवेत्।।

स पण्डितगणैरुक्तो विधिर्निरवकाशकः।।"

[6]तथैव

[7]गुरुपदहालदारकृत-व्याकरणदर्शनेर इतिहास-इति ग्रन्थस्य उपोद्घाते(३७५ पृष्ठायाम्)।

[8]पाणिनीयाष्टाध्यायी –२/३/१ ।

[9]पाणिनीयाष्टाध्यायी –२/३/१८ ।

[10]पाणिनीयाष्टाध्यायी – १/४/२ ।

[11]पाणिनीयाष्टाध्यायी –२/३/२ ।

[12]"अनभिहिते" इति सूत्रस्य भाष्यम्।

[13]पाणिनीयाष्टाध्यायी –२/३/२ ।

[14]पाणिनीयाष्टाध्यायी –२/३/१ ।